# N 599

Seat No. | | | | | | | |

2024 III 11 1500 -**N 599**- SANSKRIT (COMPOSITE) (D) (SECOND OR THIRD LANGUAGE) (SK)

(REVISED COURSE)

**Time : 2 Hours** (Pages 11) **Max. Marks : 40**

**सूचना :**

(1) सूचनानुसारम् आकृतयः आरेखितव्याः।

(2) आकृतीनाम् आरेखनं मसीलेखन्या कर्तव्यम्।


(3) सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम्।


(4) लेखनं सुवाच्यं, स्पष्टं लेखननियमानुसारं च भवेत्।

## प्रथमः विभागः—सुगमसंस्कृतम् 6

1. (अ) चित्रं दृष्ट्वा नामानि लिखत। (4 तः 3) 3

(1) 

(2) 

(3) 

(4) 

Allpyqs.com

(आ) सङ्ख्याः अक्षरैः/अङ्कैः लिखत। (3 तः 2) 2

(1) १२

(2) एकत्रिंशत्।

(3) ९०

(इ) समय-स्तम्भमेलनं कुरुत। 1

| 'अ' | 'आ' |
|---|---|
| (1) सार्ध-षड्वादनम् | १.१० |
| (2) दशाधिक-एकवादनम् | ३.०० |
| | ६.३० |

## द्वितीयः विभागः—गद्यम् 14

2. (अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत। 4

> एकस्मिन् दिने शङ्करः स्नानार्थं पूर्णानदीं गतः। यदा सः स्नाने मग्नः तदा तत्र एकः नक्रः आगतः। नक्रः झटिति तस्य पादम् अगृह्णात्। तदा शङ्करः उच्चैः आक्रोशत्। "अम्ब! त्रायस्व। नक्रात् त्रायस्व!" आक्रोशं श्रुत्वा नदीतीरं प्राप्ता आर्याम्बा पुत्रं नक्रेण गृहीतमपश्यत्। भयाकुला सा अपि रोदनम् आरभत। शङ्करः मातरम् आर्ततया प्रार्थयत— "अम्ब, इतःपरम् अहं न जीवामि। मरणात् पूर्वं संन्यासी भवितुम् इच्छामि।

अधुना वा देहि अनुमतिम्।'' चेतसा अनिच्छन्ती अपि विवशा माता अवदत् – ''वत्स, यथा तुभ्यं रोचते तथैव भवतु। इदानीमेव संन्यासं स्वीकुरु। मम अनुमतिः अस्ति'' इति। तत्क्षणमेव आश्चर्यं घटितम्। दैववशात् शङ्करः नक्राद् मुक्तः। स नदीतीरम् आगत्य मातुः चरणौ प्राणमत्।

अनन्तरं शङ्करः मातरं संन्यासस्य महत्त्वम् अवाबोधयत्। संन्यासी न केवलम् एकस्याः पुत्रः। विशालं जगद् एव तस्य गृहम्। 'मातः, यदा त्वं स्मरिष्यसि तदा एव त्वत्समीपमागमिष्यामि' इति मात्रे प्रतिश्रुत्य सः गृहात् निरगच्छत्। ततः गोविन्दभगवत्पादानां शिष्यो भूत्वा सः सर्वाणि दर्शनानि अपठत्। तेभ्यः संन्यासदीक्षां गृहीत्वा वैदिकधर्मस्य स्थापनार्थं प्रस्थानम् अकरोत्।

अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित्।
षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात्॥

(1) **अवबोधनम्।** (3 तः 2) 2

(क) **कः कं वदति ?** 1

''इदानीमेव संन्यासं स्वीकुरु।''

(ख) वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत। 1

एकस्मिन् दिने शङ्करः स्नानार्थं शरयूनदीं गतः।

(ग) **एषः गद्यांशः कस्मात् पाठात् उद्धृतः ?** 1

(2) शब्दज्ञानम्। (3 तः 2) 2

(क) गद्यांशात् 2 सप्तमी–विभक्त्यन्तपदे चित्वा लिखत। 1

(ख) गद्यांशात् विशेषण-विशेष्ययोः मेलनं कुरुत। 1

| विशेषणम् | विशेष्यम् |
|---|---|
| (1) गृहीतम् | माता |
| (2) विवशा | पुत्रम् |
| | दर्शनानि |

(ग) पूर्वपदं/उत्तरपदं लिखत। 1

(1) तत्क्षणमेव = तत्क्षणम् + ……………………।

(2) गृहीतमपश्यत् = ……………… + अपश्यत्।

(आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत। 4

भूपालः पृथुवैन्यः नाम धरायां प्रथमः अभिषिक्तः सम्राट्। प्रयागक्षेत्रे पृथुनृपस्य राजधानी आसीत्। राज्याभिषेकसमये चारणाः पृथुनृपस्य स्तुतिं गातुमुत्सुकाः। तदा पृथुः आज्ञापयत्, ''तिष्ठन्तु चारणाः! यावत् मम सद्गुणाः न प्रकटीभवन्ति तावदहं न स्तोतव्यः। स्तवनं तु ईश्वरस्यैव भवेत्।'' स्तुतिगायकाः पृथुनृपस्य एतादृशीं निःस्पृहतां ज्ञात्वा प्रसन्नाः अभवन्।

एकदा पृथुराजः स्वराज्ये भ्रमणम् अकरोत्। भ्रमणसमये तेन दृष्टं यत् प्रजाः अतीव कृशाः अशक्ताश्च। ताः प्रजाः पशुवज्जीवन्ति। निकृष्टान्नं खादन्ति। तद् दृष्ट्वा राजा चिन्ताकुलः जातः। तदा पुरोहितोऽवदत्, ''हे राजन्, धनधान्यादि सर्वं वस्तुजातं वस्तुतः वसुन्धरायाः उदर एव वर्तते। तत्प्राप्तुं यतस्व।''

(1) **अवबोधनम्। (3 तः 2)** 2

**(क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत।** 1

(1) ............... पृथुनृपस्य राजधानी आसीत्।

(काशीक्षेत्रे/प्रयागक्षेत्रे)

(2) स्तवनं तु ...................... भवेत्।

(मानवस्यैव/ईश्वरस्यैव)


**(ख) पूर्णवाक्येन उत्तरं लिखत।** 1

चारणाः किमर्थम् उत्सुकाः ?

**(ग) अमरकोषात् शब्दं योजयित्वा वाक्यं पुनर्लिखत।** 1

राजा चिन्ताकुलः जातः।

(2) **गद्यांशं पठित्वा जालरेखाचित्रं पूरयत।** 2




Allpyqs.com

(इ) गद्यांशं पठित्वा सरलार्थं लिखत। (2 तः 1) 4

(1)

| | | |
|---|---|---|
| वैखानसः | – | राजन्! समिदाहरणाय प्रस्थिता वयम्। एष खलु कण्वस्य कुलपतेः अनुमालिनीतीरमाश्रमो दृश्यते। प्रविश्य प्रतिगृह्यताम् आतिथेयः सत्कारः। |
| दुष्यन्तः | – | तपोवननिवासिनामुपरोधो मा भूत्। अत्रैव रथं स्थापय यावदवतरामि। https://www.maharashtrastudy.com |

(2)

| | | |
|---|---|---|
| विश्वामित्रः | – | अयि मातः, विश्वामित्रोऽहम्। दूरतः आयातः रथैः शकटैः च। वयं सर्वे परतीरं गन्तुं समुत्सुकाः। |
| नदी (शुतुद्री) | – | विप्रवर, मधुरा खलु ते वाणी। रञ्जयति अस्मान्। वद, कथं तव साहाय्यं कर्तव्यम् ? |

(ई) माध्यमभाषया उत्तरं लिखत। (2 तः 1) 2

(1) काकेन कः उपायः उक्तः ?

(2) महर्षिः कणादः परमाणु विषये किं प्रतिपादितवान् ?

## तृतीयः विभागः—पद्यम्

10

3. (अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत। (5 तः 4) 4

यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः।
तथा चतुर्भिः पुरुषः परीक्ष्यते श्रुतेन शीलेन गुणेन कर्मणा॥
अयं न भक्तो न च पूजको वा
घण्टां स्वयं नादयते तथापि।
धनं जनेभ्यः किल याचतेऽयम्
न याचको वा न च निर्धनो वा॥
वाल्मीकिव्यासबाणाद्याः प्राचीनाः कविपण्डिताः।
तान् शिक्षयन्ति सततं ये सदा वाचने रताः॥
घटं भिन्द्यात् पटं छिन्द्यात् कुर्याद्रासभरोहणम्।
येन केन प्रकारेण प्रसिद्धः पुरुषो भवेत्॥

(क) पूर्णवाक्येन उत्तरं लिखत। 1

पुरुषपरीक्षा कथं भवति ?

**(ख)** विशेषण-विशेष्ययोः मेलनं कुरुत। 1

| विशेषणम् | विशेष्यम् |
|---|---|
| (1) प्राचीना: | पुरुष: |
| (2) प्रसिद्ध: | कविपण्डिता: |
| | घटम् |

**(ग)** जालरेखाचित्रं पूरयत। 1

| | | |
|---|---|---|
| न .................... | | न पूजक: |
| | लोकयानवाहक: | |
| न निर्धन: | | न .................... |

**(घ)** पद्यांशात् 2 द्वितीयाविभक्त्यन्तपदे चित्वा लिखत। 1

**(च)** पूर्वपदं/उत्तरपदं लिखत। 1

(1) तथापि = तथा + .................................................. ।

(2) कुर्याद्रासभरोहणम् = ........................ + रासभरोहणम्।

Allpyqs.com

(आ) पद्ये शुद्धे पूर्णे च लिखत। (3 तः 2) 4

(1) अल्पानाम् ........................................ मत्तदन्तिनः॥

(2) यत्र ........................................ द्रुमायते॥

(3) वैद्यराज ........................................ धनानि च॥

(इ) माध्यमभाषया सरलार्थं लिखत। (2 तः 1) 2

(1) मनुजा वाचनेनैव बोधन्ते विषयान् बहून्।

दक्षा भवन्ति कार्येषु वाचनेन बहुश्रुताः॥

(2) यथैव सकला नद्यः प्रविशन्ति महोदधिम्।

तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः॥

## चतुर्थः विभागः—भाषाभ्यासः

10

4\. (अ) पृथक्करणम् । 4

(1) मञ्जूषातः नामानि सर्वनामानि च पृथक्कुरुत। (5 तः 4) 2

| नाम | सर्वनाम |
| --- | --- |
| | |

(मञ्जूषा — अरण्ये, वयम्, नदी, ताः, रथैः)

(2) मञ्जूषातः क्रियापदानि धातुसाधित-विशेषणानि च पृथक्कुरुत। (5 तः 4) 2

| क्रियापदम् | धातुसाधित-विशेषणम् |
|---|---|
| | |

(**मञ्जूषा** — आनयति, हतः, अगच्छत्, कर्तव्यम्, भवेत्)

**(आ) निर्दिष्टाः कृतीः कुरुत। (4 तः 2)** 4

(1) **सङ्ख्या/क्रम/आवृत्तिवाचकस्य योग्यं पर्यायं चित्वा वाक्यं पुनर्लिखत। (3 तः 2)** 2

(क) .................................. वेदाः वर्तन्ते।

(चत्वारः/चत्वारि)

(ख) श्रीकृष्णः देवक्याः .......................... अपत्यम्।

(अष्टमम्/अष्ट)

(ग) अहम् एकं पाठं ...................... सम्यक् पठामि। (द्विवारं/द्वौ)

(2) **समासविग्रहाणां समासनामभिः सह मेलनं कुरुत। (6 तः 4)** 2

| समासविग्रहः | समासनाम |
|---|---|
| (1) रामस्य अभिषेकः। | इतरेतर-द्वन्द्वः। |
| (2) न शक्यम्। | कर्मधारयः। |
| (3) मृगः च शृगालः च। | षष्ठी-तत्पुरुषः। |
| (4) सद्गुणाः एव सम्पत्तिः। | अव्ययीभावः। |
| (5) महान् भागः यस्य सः। | नञ्-तत्पुरुषः। |
| (6) क्रमम् अनुसृत्य। | बहुव्रीहिः। |

(3) **मञ्जूषातः समानार्थकशब्दान्/विरुद्धार्थकशब्दान् चित्वा लिखत।** 2

(1) कुसुमम् = ............................ ।

(2) लघुः × ............................ ।

(3) मृगः = ............................ ।

(4) बद्धः × ............................ ।

(**मञ्जूषा** – मुक्तः, हरिणः, पुष्पम्, गुरुः)

(4) **योग्यं पर्यायं चिनुत।** (3 तः 2) 2

(क) कणादेन परमाणोः व्याख्या कृता। (कर्तृवाच्यम्/कर्मवाच्यम्)

(ख) त्वम् आत्मानं मृतवत् ............................ । (सन्दर्शय/सन्दर्शयतु)

(ग) संस्कृतभाषा मम ............................ भाषा। (प्रियम्/प्रिया)

**(इ) विशिष्ट-विभक्तेः उपयोगं कृत्वा वाक्यनिर्माणं कुरुत। (4 तः 2)** **2**

(1) कथ् (10 उ.प.)

(2) विना

(3) गम्-गच्छ्-(1 प. प.)

(4) नमः

Allpyq.com